**मैत्री विद्या निकेतन रिसली भिलाई**

**जांच परीक्षा 2022-23**

**दशमकक्षायाम विषय – संकृतम कोड (122)**

**समय—होरात्रयम।** **पूर्णांक:-80**

**'क' खण्डम –अपठित अवबोधनम (10)**

**'ख' खण्डम -रचनात्मकाययम (15)**

**'ग' खण्डम- व्याकरणम (25)**

**घ' खण्डम- पठित अवबोधनम (30)**

## 'क' खण्डम –अपठित अवबोधनम –(10)

**प्रशन:-1. अधोलिखित गद्यांश पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखता। (10)**

एकदा एकः कर्तव्यपरायण: नगररक्षकः इतस्ततः भ्रमन् एकम् अशीतिवर्षीय महापुरुषम् अपश्यत् । सः आम्रवृक्षस्य आरोपणे तल्लीनः आसीत्। इदं दृष्ट्वा नगररक्षकः तं महापुरुषम् अवदत् – अवलोकनेन प्रतीयते यत् यदा एषः वृक्षः फलिष्यति तदा भवान् जीवितः न भविष्यति। अतः किमर्थं वृथा परिश्रमं कुर्वन्ति भवन्तः ? महापुरुषः हसित्वा अवदत्-पश्यन्तु एतान् फलयुक्तान् वृक्षान् । एतेषाम् आरोपणं मया न कृतं परं फलानि अहं खादित्वा सन्तुष्टः भवामि। अतः यदा मम आरोपितस्य वृक्षस्य फलानि अन्ये खादिष्यन्ति, अहं पुनः प्रसन्नः भविष्यामि महापुरुषस्य वचनं श्रुत्वा तं स नमस्कृत्य नगररक्षकः उक्तवान्- अनुकरणीया एव सज्जनानां सज्जनता

**(1) एकपतेन उत्तरत** **(1×2=2)**

**(i)** नगररक्षकः कीदृशं महापुरुषम् अपश्यत् ?

**(ii)** सज्जनानां सज्जनता कीदृशी भवति ?

**(2) पूर्णवाक्येन उत्तरत** **(2×2=4)**

**(i)** नगररक्षकः अशीतिवर्षीय महापुरूष कुत्र अपश्यत् ?

**(ii)** महापुरुषेण आरोपितस्य वृक्षस्य फलानि के खादिष्यन्ति ?

**(3)अस्य अनुच्छेदस्य कृते उपयुक्त शीर्षक लिखत ।** **(1)**

**(4) भाषिककार्यम्।** **(1×3=3)**

**(i)** 'नगररक्षक:' इति पदस्य विशेषणपदं किम् अस्ति ?

**(ii)** 'दुर्जनानाम्' इति पदस्य कः विपर्ययः ?

**(iii)** अस्मिन् गद्यांशे भविष्यामि इति क्रियापदस्य कर्तृपदं किम् ?

## 'ख' खण्डम -रचनात्मकाययम –(15)

**प्रशन:-2 शुल्कक्षमापनार्थं प्रधानाचार्य प्रति पत्रम्** **(5)**

सेवायाम्

प्रधानाचार्य महोदया

केन्द्रीय विद्यालयः

आर. के. पुरम, सैक्टर: चतुर्थः

नव दिल्ली-110022

विषय: शुल्क क्षमापना **(i)........................**

**(ii)........................**महोदयाः

सविनयम **(iii)........................**यत् अहं भवतः**(iv)...........**दशमकक्षामा 'स' वर्गस्य

**(v)..............** अस्मि मम पिता **(vi)**...........'विद्यालये द्वारपालः अस्ति तस्य मानम् द्विसहस्रकमात्रम्

अस्ति।**(vii)**.................कुटुम्बे पञ्च सदस्याः सन्ति । अनेन वेतनेन कुटुम्बस्य निर्वाह:**(viii)**...........भवति । अतः शुल्कक्षमापनार्थं प्रार्थये आक्षासे यत् मदीयाम् इमां**(xi)**...............

स्वीकृत्य शुल्कक्षमापनद्वारा माम् **(x)**.................श्रीमन्तः।

धन्यवादाः।

भवतां विनीतः शिष्यः

कक्षा 10

दिनाङ्क**:**.................

**मञ्जूषा**:-निवेदनम्, उपभरिष्यन्ति, प्रार्थना, काठिन्येन, अस्माकं, एकस्मिन् **,** छात्रः, मान्यवराः, निवेदनमस्ति विद्यालये।

**प्रशनः-3 प्रदत्तं चित्र दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत (5)**

**मञ्जूषा:** क्रीडन्ति, उद्यानस्य, भ्रमन्ति, पुष्पाणि, वृक्षाः बालाः, चित्रकार्यम्, हरीतिमा, दोलयतः



**अथवा**

**एकम् अनुच्छेद लिखत** :- **क्रीडाप्रतियोगिता**

**प्रशनः-4 अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत। (1×5=5)**

(**i)**वे सब देवालय को गए। **(ii)** देव सदैव उपकार करते हैं।

**(iii)** रावण का युद्ध असत्य पर सत्य की विजय था। **(iv)** परिश्रमी छात्र ही सफलता प्राप्त करते हैं।

**(v)** ईश्वर सदा कर्मशीलों के साथ होते हैं।

## 'ग' खण्डम- व्याकरणम - (25)

**प्रशनः-5 अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा लिखत (1×4=4)**

**(i)** अस्य नाटकस्य **नै + अकः** कः अस्ति ?

**(ii) मदोद्धताः** कपयः अवदन्

**(iii)** तस्य राज्ञः **एक + छत्रं** राज्यम् आसीत्

**(iv) कृष्णः चलति** कुरुक्षेत्रे

**प्रशनः-6 अधोलिखितवाक्येषु समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत (1×4=4)**

**(1)** अद्य **राष्ट्रपतेः भवने** संस्कृतविदुषां सम्मानसमारो आयोज्यते ।
**(i)**राष्ट्रपतिनिवासे **(ii)**राष्ट्रपतीयभवने **(iii)**राष्ट्रपतिभवने

**(2)**कदापि **अनृतं** न वक्तव्यम् ।

**(i)**न ऋतम् **(ii)**अनु + क्त **(iii)**ऋत + न ।

**(3)माता- पितरौ** प्रणम्य परीक्षाभवनं गच्छ ।

**(i)**माता च पितरी च **(ii)** माता च पिता च **(iii)** मातरी च पितरौ च

**(4)** एतद् आचरणं साधुजनस्य **रूपस्य योग्यं** नास्ति

**(i)**रूपयोग्यम् **(ii)**रूपस्य निकटे **(iii)** अनुरूपम्।

**प्रशनः-7 अधोलिखितवाक्येषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यःचित्वा लिखत । (1×4=4)**

**(1)** आपद्गतेनापि एतद् अस्त्रं मानवेषु न **प्र युज् + तव्यत्**
(i)प्रयोजनीयम् (ii) प्रयोक्तव्यम् (iii) प्रयुक्तम्

**(2)** भवान् जानाति द्रौणेः **चपलाम्** प्रकतिम्

**(i)**चपल + टाप् **(ii)** चपल + ला **(iii)** चपल + आम्

**(3)** यथासमयं सर्वेषां **महत्त्वं** विद्यते

**(i)** महत् + त्व **(ii)** महान् + त्वम् **(iii)** महत् + तु ।

**(4) धैर्यवान्** जनः लोके पराभवं न प्राप्नोति ।

**(i)**धैर्य + मतुप् **(ii).** धैर्य + क्तवतु **(iii)** धैर्य + शानच्

**प्रशनः-8 वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत-**

**(1×4=4)**

**(1)मालिका -** प्रतिष्ठे ! किं त्वं संस्कृतस्य विज्ञानप्रदर्शनीं द्रष्टुं ..........?

**(i)**गम्यते **(ii)**गच्छति **(iii)** गच्छसि **(iv)** गच्छामि

**(2) प्रतिष्ठान** मालिके!**.................**तत्र न गम्यते ।

**(i)**मया **(ii)** अहम् **(iii)** त्वया **(iv)** आवाम्

**(3). मालिका** अधुना त्वया गृहे किं**...............** ?

**(i)** क्रियन्ते **(ii)** करोषि **(iii)** करोति **(iv)** क्रियते

**(4)**प्रतिष्ठा धः मम परीक्षा भविष्यति अतः मया अधुना............. पठयन्ते

**(i).** पुस्तकम् (**ii)** पुस्तकानि (**iii)** पुस्तकैः **(iv)** पुस्तके

**प्रशनः-9 प्रवत्तेभ्यः विकल्पेभ्यः समुचितं कालबोधकशब्दं कुरुत । (1×3=3)**

**(i)**मम माता प्रातः**.....................**(5**:**15) वादने उतिष्ठति ।

**(ii)**सा-----------(6**:**00) वादने योगाभ्यासं करोति

**(iii)**तदन्तरम् सा खात्या...**..............**(7:45) वादने भोजन पचति

**प्रशनः-10 वाक्यानुगुणम् उचिता अव्ययपदं चिनुत- (3)**

**(i)** त्वम् एवं...**............** वद ।

**(ii)** सः...**..................**असत्यं न अवदत् ।

**(iii)** **.....................**शीतकालो वर्तते।

**मञ्जूषा-**कदापि, मा, सम्प्रति, अपि , एव

**प्रशनः-11अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। शुद्ध पदम लिखत (3)**

**(i)** **त्वां** पितुः नाम किम् अस्ति ?

(क) त्वम् (ख) तव (ग) त्वया (घ) त्वयि

**(ii)** ते श्वः विद्यालयं **गच्छन्ति** ।

(क) अगच्छन्. (ख) गमिष्यति (ग) गमिष्यन्ति (घ) अगच्छताम्

**(iii)** यत्रास्ते सा **धूर्ताः** तत्र गम्यताम्

(क) धूर्ता (ख) धूर्तः (ग) धूर्ती (घ) धूर्ते

## 'घ' खण्डम- पठित अवबोधनम–(30)

**प्रशनः- 12 अधोलिखितान् गद्यांशं पठित्वा प्रश्नानाम् उत्तरत–. (5)**

"बहुन्यपत्यानि मे सन्तीति सत्यम् । तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामनुभवामि। यतो हि अवमन्येभ्यो दुर्बलः । सर्वेष्वपत्येषु जननी तुल्यवत्सला एव । तथापि दुर्बले सुते मातुः अभ्यधिका कृपा सहजैव" इति। सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्। स च तामेवमसान्त्वयत्-" गच्छ वत्से! सर्व भद्रं जायेत अचिरादेव चण्डवातेन मेघरवैश्च सह प्रवर्षः समजायत। पश्यतः एव सर्वत्र जलोपप्लवः सञ्जातः। कृषकः हर्षातिरिकेण कर्षणाविमुखः सन् वृषभौ नीत्वा गृहमगात्।

**(1) एकपदेन उत्तरत**

(i) सर्वेष्वपत्येषु जननी कीदृशी भवति ?

(ii**)** कुत्र जलोपप्लवः सञ्जातः ?

**(2) पूर्णवाक्येन उत्तरत**

(i) कस्य वचनं श्रुत्वा भृश विस्मितस्याखण्डलस्यापि हृदयमद्रवत्?

**(3) निर्देशानुसारम् उचितम् उत्तरं प्रवत्तविकल्पेभ्यः चित्वा लिखत**

(i) 'अनुभवामि' इति क्रियापदस्य कर्तृपद किम्?

(ii) 'जनकः' इति पदस्य विपर्ययपदं किम् ?

**प्रशनः- 13 निम्न श्लोकान् पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत (5)**

**मृगा मृगैः सङ्गमनुव्रजन्ति,**

**गावश्च गोभिः तुरगास्तुरङ्गैः ।**

**मूर्खाश्च मूर्खैः सुधियः सुधीभिः,**

**समान- शील- व्यसनेषु सख्यम् ॥**

**(I) एकपदेन उत्तरत**

(i) मृगाः केन सङ्गमनुव्रजन्ति ?

(ii) मूर्खः सह के अनुव्रजन्ति ?

**(II) पूर्ण वाक्य उत्तर**

· सख्यम् समान- शील- व्यसनेषु भवति ?

**(III) भाषिककार्यम्**

(i) 'अनुव्रजन्ति' इति क्रिया पदस्य कर्ता कः?

(ii) 'तुरगा' इति कर्तृपदस्य क्रियापदं किम् ?

(iii) 'सुधीभिः' इति पदस्य विपर्ययपदं किं प्रयुक्तम् ?

**प्रशन :-14 अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - (5)**

**काकः-**रे परभृत्! अहं यदि तव संततिं न पालयामि तर्हि कुत्र स्युः पिकाः? अतः अहम् एव करुणापरः पक्षिसम्राट् काकः ।

**गजः**- समीपतः एवागच्छन् अरे! अरे! सर्वां वार्तां शृण्वन्नेवाहम् अत्रागच्छम् । अहं विशालकायः, बलशाली, पराक्रमी चा सिंहः वा स्यात् अथवा अन्यः कोऽपि । वन्यपशून् तु तुदन्तं जन्तुमहं स्वशुण्डेन पोचवित्वा मारयिष्यामि । किमन्यः कोऽप्यस्ति एतादृशः पराक्रमी । अतः अहमेव योग्यः वनराजपदाय ।

वानरः- अरे! अरे! एवं वा (शीघ्रमेव गजस्यापि पुच्छं विधूय वृक्षोपरि आरोहति )

**(1) एकपदेन उत्तरत-**

(i) काकः कस्य सन्ततिं पालयति ?

(ii)करुणापरः पक्षिसम्राट् कः ?

**(2) पूर्णवाक्येन उत्तरत-**

गजः आत्मानं विषये किं कथयति ?

**(3) भाषिककार्यम्-**

(i) 'सर्वाम् वार्ताम्' अत्र विशेष्यपदं किं प्रयुक्तम् ?
(ii) 'अहमेव योग्यः' अत्र अहम् पदं कस्मै प्रयुक्तम् ?
(iii) 'पालयामि' इति क्रियापदस्य कर्तृपदं किम् ?
(iv) बानर इति कर्तृपदस्य क्रियापदम् किम्?

**प्रशनः-15. रेखांकितपदानां आधृत्य प्रश्न निर्माण कुरुत (कानि चार) (4)**

(i)भूकम्पविभीषिका विशेषेण कच्छजनपदं **ध्वंसावशेषेषु** परिवर्तितवती।

(ii)**वैज्ञानिकाः** कथयन्ति यत् पृथिव्याः अन्तर्गर्भे, पाषाणशिलानां संघर्षणेन कम्पनं जायते।

(iii)विवशाः प्राणिनः **आकाशे** पिपीलिकाः इव निहन्यन्ते ।

(iv)**एतादृशी** भयावहघटना गढ़वालक्षेत्रे घटिता।

(v) तदिदानीम् **भूकम्पकारणं** विचारणीयं तिष्ठति ।

**प्रशनः-16 अधोलिखितश्लोकानाम् अन्वयं मञ्जूषातः उचितं पदं चित्वा पूरयत** **(4)**

**एक एव खगो मानी वने वसति चातकः ।**

**पिपासितो वा म्रियते याचते वा पुरन्दरम्।।**

**अन्वयः**-एकः एवं (i)...............खगः चातकः (ii)...............वसति वा (iii)........म्रियते (iv)............ यचते वा

मञ्जूषा- **[**वने, पिपासितः, मानी, पुरन्दरम् **]**

**प्रशन :-17 अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम्**

**उचितार्थं चित्वा लिखत- (केवलं प्रनत्रयम्)** **(1×3=3)**

**(i)** तस्य **भार्या** बुद्धिमती पितुर्गृहं प्रति चलिता।

**(ii)** मा **ब्रूहि** दीनं वचः ।

**(iii)** एतेन आरक्षिणा **अध्वनि** यदुक्तं तद् वर्णयामि

**(iv)** शतशकटीयानं धूमं **मुञ्चति**

**प्रशनः-18अधोलिखितानि वाक्यानि घटनाक्रमानुसारेण योजयत** **(4)**

(i)सः पुत्रं द्रष्टुम् पदातिरेव प्राचलत्।

(ii) तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः ।

(iii) चौरः एव उच्चैः क्रोशितुमारभत ।

(iv) कश्चन निर्धनः जनः वित्तम् उपार्जितवान्।

(v) रात्रिनिवासं कर्तुम् कञ्चिद् गृहस्थमुपागतः ।

(vi)एकदा तस्यपुत्र रुग्णः जातः ।

(vii) चौरस्य पादध्वनिना अतिथिः प्रबुद्धः ।

(viii) ग्रामवासिनः वराकमतिथिमेव चौरं मत्वाऽ भर्त्सयन्।